सप्तदशः पाठः
१७

उदासीनाचार्यः श्रीचन्द्रः



शिष्यः (सिक्ख) सम्प्रदायस्य प्रतिष्ठापकस्य गुरुनानकदेवस्य सुपुत्रः श्रीचन्द्रः नवम्यां तिथौ भाद्रपदमासे शुक्लपक्षे १५५९ विक्रमाब्दे (१४९४ ख्रीस्ताब्दे) जन्म लब्धवान् । माता चास्य सुलक्षणवती सुलक्षणादेवी आसीत् । श्रीचन्द्रः बाल्याद् एव शिवः इव वीतरागः दानशीलः योगसाधनायां रतः आसीद् अतः समगुणत्वात् जनाः तं शिवस्य अवताररूपे भावयन्ति स्म। बालकस्य श्रीचन्द्रस्य मातामहः श्रीमूलचन्द्रः तं ''पक्खोका'' नामधेयं स्वग्रामम् अनयत् । तत्र सः त्रीणि वर्षाणि अवसत् ।

पण्डितः हरदयालुशर्मणा श्रीचन्द्रस्य यज्ञोपवितसंस्कारः सम्पादितः । कश्मीरवासिनः पण्डितपुरूषोत्तम कौलात् शिक्षां प्राप्य शीघ्रमेव विद्यायां पारङ्गतः भूत्वा सः श्रीचन्द्रमौली नाम्ना ख्यातः जातः ।

अध्ययनकाले चतुर्दशवर्षीयः श्रीचन्द्रः विद्यागर्वेण ग्रसितं पं. सोमनाथत्रिपाठिनं शास्त्रार्थे विजित्य वैदिकधर्मस्य प्रचारार्थं सः सम्पूर्णभारतस्य विविध-स्थानेषु भ्रमणम् अकरोत् । धर्मं प्रति निष्ठाम् अपि स्थापितवान् । सः हुमायूं प्रजापालनस्य उपदेशं दत्त्वा सत्पथे आनयत् । सः महाराणाप्रतापं स्व गौरवमयिवंशपरम्परां स्मारयित्वा कर्तव्यपथे अग्रेसरं कृतवान् । श्रीमात्राशास्त्रम्, श्रीचन्द्रसिद्धान्तसागरः श्रीचन्द्रसिद्धान्तमञ्जरी, सिद्धान्त-पुचकर्म, रत्नपञ्चकर्मप्रभृतीन् ग्रन्थान् रचयित्वा मानवसेवायाः कार्यम् अकरोत् । आचार्यस्य श्रीचन्द्रस्य दार्शनिकाः सिद्धान्ताः विशेषरूपेण अनुसरणीयाः सन्ति । परमाचार्यश्रीचन्द्रस्य चत्वारः शिष्याः बालहासः, गोविन्ददेवः, पुष्पदेवः (फूलसाहब) कमलासनश्च अभवन् । एवं वैदिकधर्मप्रचारार्थं भारतीयसंस्कृतेः रक्षणार्थं राष्ट्रभक्ति-भावनायाः विकासाय पञ्चदेवोपासनायाः प्रचाराय अनवरतरूपेण कष्टानि सोढ्वा स्वजीवनस्य सार्थकतां साधितवन्तः। तस्य कार्याणि उपदेशाः च अद्यापि प्रासङ्गिका उपयोगिनः च सन्ति ।

शब्दार्थः

शब्दः	सरलार्थः	हिन्दी अर्थ
सुलक्षणवती	शोभनलक्षणवती	सुन्दर लक्षणों वाली
बाल्याद्	बाल्यकालात्	बचपन से
वीतरागः	आसक्त्याः रहित	विना आसक्ति से
मातामहः	मातुः पिता	नाना
विद्यागर्वेण	विद्यायाः अभिमानेन	विद्या के अभिमान से
विजित्य	विजयं प्राप्य	विजय प्राप्त करके
स्मारयित्वा	स्मरणं कृत्वा	याद करके
अनुसरणीयाः	अनुसरणं करणीयाः	अनुसरण करने योग्य
रक्षणार्थं	रक्षार्थम्	रक्षा के लिये
अध्यापि	सम्प्रतिमपि	आज भी
सोढ्वा	सहनं कृत्वा	सहन करके

अभ्यासः

१. निम्नपदानाम् उच्चारणं कुरुत –

योगसाधनायाम्,	समगुणत्वात्,	मातामहः,
त्रीणिवर्षाणि,	प्रचारार्थम्,	राष्ट्रभक्तिभावनायाः

२. एकवाक्येन उत्तरत –

(क) सिक्खसम्प्रदायस्य प्रतिष्ठापकः कः ?

(ख) बाल्याद् एव शिवः इव वीतरागः दानशीलः कः आसीत् ?

(ग) बालकं श्रीचन्द्रं पक्खोका ग्रामं कः अनयत् ?

(घ) श्रीचन्द्रस्य यज्ञोपवीतसंस्कारः केन सम्पादितः ?

(ङ) विद्यागर्वेण ग्रसितः कः आसीत् ?

(च) श्रीचन्द्रः उपदेशं दत्त्वा कं सत्पथे आनयत् ?

३. रेखाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत –

(क) सः स्वधर्मं प्रति <u>निष्ठाम्</u> अपि स्थापितवान् ।

(ख) तस्य कार्याणि अद्यापि <u>प्रासङ्गिकानि</u> सन्ति ।

(ग) सः <u>वैदिकधर्मस्य</u> प्रचारार्थम् अनवरतरूपेण कार्यम् अकरोत् ।

(घ) तस्य माता सुलक्षणादेवी आसीत् ।

(ङ) सः बाल्याद् एव <u>योगसाधनायां</u> रतः आसीत् ।

(च) तस्य जन्म नवम्यां तिथौ <u>भाद्रपदमासे</u> शुक्लपक्षे अभवत् ।

४. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत –

यज्ञोपवीतसंस्कारः, पारङ्गतः, मानवसेवायाः, विद्यागर्वेण, निष्ठाम्।

(क) सः अनेकान् ग्रन्थान् रचयित्वा .... कार्यम् अकरोत् ।

(ख) स्वधर्मं प्रति .... अपि स्थापितवान् ।

(ग) पं. हरदयालुशर्मणा चन्द्रस्य .... सम्पादितः ।

(घ) पं. पुरूषोत्तमकौलात् शिक्षां प्राप्य, विद्यायां .... अभवत् ।

(ङ) श्रीचन्द्रः................ ग्रसितं पं. सोमनाथत्रिपाठिनं शास्त्रार्थे जितवान् ।

५. विलोमपदानि सुमेलयत -

(क)	जन्म	दत्त्वा
(ख)	प्राप्य	मृत्युः
(ग)	विद्यायाम्	कुमार्गे
(घ)	वीतरागः	अविद्यायाम्
(ङ)	सत्पथे	विस्मृत्य
(च)	स्मारयित्वा	रागयुक्तः

६. अधोलिखितपदेषु यथापेक्षितं सन्धिं/विच्छेदं कुरुत -

(क)	शीघ्रम्	+	एव	=	....
(ख)	....	+	....	=	प्रतिष्ठार्थम्
(ग)	शास्त्र	+	अर्थः	=	....
(घ)	....	+	....	=	रक्षणार्थम्
(ङ)	अद्य	+	अपि	=	....

योग्यता-विस्तारः

गुरुः नानकदेवः

श्रीगुरुनानकदेवः निष्कामकर्मयोगी अनन्यनिर्गुणभक्तः सन्तगुरुश्चासीत्। नानकदेवस्य जन्म तलवण्डी नाम्नि स्थाने (साम्प्रतं पाकिस्ताने) जातम्। तत् स्थानं 'ननकाना-साहिब, इति नाम्ना अपि उच्यते। अस्य पितुः नाम कालू मेहता मातुश्च नाम तृप्ता आसीत्। बाल्यकालाद् एव विलक्षणः असाधारणप्रतिभश्च आसीत्। ग्राम्यपरिवेशे एव वसन् अयं संस्कृत-उर्दू- पारसीकभाषाः अधीतवान्।

नानकदेवस्य प्रमुखाः सिद्धान्ताः एवं सन्ति -

- गुरुकृपयाः, परमात्मकृपया सदाचरणेन च सर्वं प्राप्तुं शक्यम्।
- मानवकल्याणस्य एकः एव मार्गः सत्यम् अस्ति। अतः सत्यस्य पालनम् एव सर्वदा करणीयम्।
- धर्मेषु पाखण्डः, आडम्बरः मिथ्याचारश्च न भवेयुः।
- समाजे भेदभावाः दूरीकरणीयाः।
- ईश्वरेच्छा एव बलीयसी। अतः यः ईश्वरेच्छानुसारं कार्यं करोति एवं दुर्गमपथि अपि साफल्यं प्राप्नोति।
- विद्वान् सः एव अस्ति यः परोपकारे विश्वकल्याणे च संलग्नः अस्ति।

'गुरुग्रन्थसाहिब' इति नामके पवित्र-ग्रन्थे नानकदेवस्य पदानां सङ्ग्रहः अस्ति। आध्यात्मिक-सामाजिक-नैतिक-मूल्यानां सम्बन्धे नानकदेवस्य वाणीव्यवहारश्च सदैव अनुकरणीयौ स्तः। नानकदेवेन प्रवर्तित-परम्परायां दश गुरवः अभवन्। अन्तिमः गुरुः श्री गोविन्दसिंहः आसीत्।